१. चित्रशब्दस्य तृतीयाविभक्तौ रूपं कथयतु ।

२. पितृशब्दस्य तृतीयाविभक्तौ रूपं कथयतु ।

३. फलशब्दस्य तृतीयाविभक्तौ रूपं कथयतु ।

४. लेखनीशब्दस्य तृतीयाविभक्तौ रूपं कथयतु ।

५. शिक्षकशब्दस्य तृतीयाविभक्तौ रूपं कथयतु ।

* * *

# त्रयोदशः पाठः

## चतुर्थी-विभक्ति-प्रयोगः - (ଚତୁର୍ଥୀ ବିଭକ୍ତି ବ୍ୟବହାର)

पश्यतु, उच्चैः पठतु: - ଦେଖ, ବଡ଼ପାଟିରେ ପଢ଼ ।



कृषकः



ग्राममुख्यः



ग्राममुख्यः कृषकाय धनं ददाति ।



छात्रा




शिक्षिका



छात्रा शिक्षिकायै पुष्पं ददाति ।



पत्रवाहकः



गृहिणी



पत्रवाहकः गृहिण्यै पत्रं ददाति ।

**ଶବ୍ଦାର୍ଥ** - ଗ୍ରାମମୁଖ୍ୟଃ - ଗାଁ ମୁଖିଆ, ପତ୍ର ବାହକଃ - ଚିଠି ବହନକାରୀ (ଡାକବାଲା)।

उच्चैः पठतु जानातु च :- ବଡ଼ ପାଟିରେ ପଢ଼ ଓ ଜାଣ ।

→ धनिकः मित्राय उपायनं ददाति ।

→ पिता पुत्राय चन्द्रं दर्शयति ।

→ छात्रः पाठाय पुस्तकम् आनयति ।

→ साधुः दरिद्राय धनं वितरति ।

→ युवकः वृद्धायै वस्त्रं ददाति ।

→ जननी कन्यायै छत्रं ददाति ।

→ चिकित्सकः आतुराय औषधं ददाति ।

→ अग्रजः अनुजायै क्रीडनकं यच्छति ।

→ पितामहः जनन्यै आभूषणं यच्छति ।

→ वृद्धः युवकाय आशिषं यच्छति ।

→ गुरुः शिष्याय उपदेशं यच्छति ।

→ शिष्यः गुरवे प्रणामं निवेदयति ।

## उच्चैः पठतु - अवधेयम् (ମନେରଖ)

| प्रथमाविभक्तिः | चतुर्थीविभक्तिः | | |
|---|---|---|---|
| एकवचनम् | एकवचनम् | द्विवचनम् | बहुवचनम् |
| युवकः | युवकाय | युवकाभ्याम् | युवकेभ्यः |
| वैज्ञानिकः | वैज्ञानिकाय | वैज्ञानिकाभ्याम् | वैज्ञानिकेभ्यः |
| कविः | कवये | कविभ्याम् | कविभ्यः |
| मुनिः | मुनये | मुनिभ्याम् | मुनिभ्यः |
| बन्धुः | बन्धवे | बन्धुभ्याम् | बन्धुभ्यः |
| गुरुः | गुरवे | गुरुभ्याम् | गुरुभ्यः |
| कर्त्ता | कर्त्रे | कर्तृभ्याम् | कर्तृभ्यः |

| | | | |
|---|---|---|---|
| अभियन्ता | अभियन्त्रे | अभियन्तृभ्याम् | अभियन्तृभ्यः |
| भूमिः | भूमये / भूम्यै | भूमिभ्याम् | भूमिभ्यः |
| सन्ततिः | सन्ततये/सन्तत्यै | सन्ततिभ्याम् | सन्ततिभ्यः |
| धेनुः | धेनवे / धेन्वै | धेनुभ्याम् | धेनुभ्यः |
| तनुः | तनवे / तन्वै | तनुभ्याम् | तनुभ्यः |
| वधूः | वध्वै | वधूभ्याम् | वधूभ्यः |
| मित्रम् | मित्राय | मित्राभ्याम् | मित्रेभ्यः |
| दधि | दध्ने | दधिभ्याम् | दधिभ्यः |
| वस्तु | वस्तुने | वस्तुभ्याम् | वस्तुभ्यः |

**ଶବ୍ଦାର୍ଥ :** ଉପାୟନମ୍ - ଉପହାର ଭେଟି, ବିତରତି - ବାଣ୍ଟୁଛି, ନିବେଦୟତି - ଜଣାଉଛି, କ୍ରୀଡ଼ନକମ୍ - ଖେଳଣା, ପିତାମହଃ - ଜେଜେବାପା, ଆଭୂଷଣମ୍ - ଅଳଙ୍କାର, ଅଭିୟନ୍ତା - ଇଞ୍ଜିନିୟର, ସନ୍ତତିଃ - ପିଲାପିଲି, ତନୁଃ - ଶରୀର, ଭଗିନୀ - ଭଉଣୀ, ଯଚ୍ଛତି - ଦେଉଛି ।


**ତୁମପାଇଁ କାମ -**

ପଠିତ ବିଷୟରେ ଥିବା ବିଭିନ୍ନ ଶବ୍ଦର ଚତୁର୍ଥୀ ବିଭକ୍ତିଗତ ରୂପ ସୁନ୍ଦର ଅକ୍ଷରରେ ଲେଖି ଶିକ୍ଷକଙ୍କୁ ଦେଖାଅ । ଯେଉଁଠି ବୁଝିବା କଷ୍ଟ ହେଉଛି ଶିକ୍ଷକଙ୍କୁ ପଚାରି ବୁଝ ।

# अभ्यासः (ଅଭ୍ୟାସ)



१. उदाहरणं पश्यतु, वाक्यानि लिखतु
ଉଦାହରଣ ଦେଖ ଓ ବାକ୍ୟ ଲେଖ ।




यथाः - जनकः जनन्यै रूप्यकं ददाति ।

जननी ........................

पितामहः........................

अग्रजः ........................

अनुजा ........................

मातुलः ........................

(जनन्यै, पितामहाय, अग्रजाय, अनुजायै, मातुलाय, जनकाय)

२. कोष्ठके स्थितानां शब्दानां साहय्येन शून्यस्थानं पूरयतु ।
(କୋଠରୀରେ ଥିବା ଶବ୍ଦଗୁଡ଼ିକ ସାହାଯ୍ୟରେ ଶୂନ୍ୟସ୍ଥାନ ପୂରଣ କର ।)
उदाहरणम् -

★ जननी बालकेभ्यः अन्नं ददाति । (बालकान्, बालकेभ्यः)

क) पिता _____ वेतनं ददाति । (सेवकेभ्यः, सेवकान्)

ख) राष्ट्रपतिः _____ पुरस्कारं ददाति । (सैनिकेभ्यः, सैनिकान्)

ग) प्रधानशिक्षकः _____ प्रमाणपत्रं ददाति । (छात्रान्, छात्रेभ्यः)

घ) आपणिकः _____ वस्तूनि ददाति । (ग्राहकेभ्यः, ग्राहकान्)

३. रिक्तस्थानं पूरयतु - (ଶୂନ୍ୟସ୍ଥାନ ପୂରଣ କର)।

- मुख्यातिथिः प्रतिनिधये उपायनं ददाति ।
- गुरुः _______ आशिषं ददाति ।
- आपणिकः _______ वस्तु ददाति ।

- कृषकः ________ शस्यं ददाति ।
- श्वशुरः ________ कङ्कणानि ददाति ।
- पुत्रः ________ औषधं ददाति ।
- छात्रः ________ प्रणामम् अर्पयति ।

(शिष्याय, ध्वजायै, पित्रे, वधूभ्यः, धेनवे, ग्राहकाय)

४. मातृभाषया अर्थं लिखत । (ମାତୃଭାଷାରେ ଅର୍ଥ ଲେଖ)

वैज्ञानिकेभ्यः, कवये, कर्त्रे, दध्ने, सन्ततये ।

५. संस्कृतेन लिखतु । (ସଂସ୍କୃତରେ ଲେଖ)

ବନ୍ଧୁଙ୍କୁ, ଯୁବକକୁ, ଗୁରୁଙ୍କୁ, କର୍ତ୍ତାଙ୍କୁ, ମୁନିଙ୍କୁ ।

६. वाक्यानि रचयतु (ବାକ୍ୟ ରଚନା କର)

पित्रे, मित्राय, पितामहाय, कवये, मुनये ।

***

# चतुर्दशः पाठः

## पञ्चमीविभक्तिप्रयोगः - (ପଞ୍ଚମୀ ବିଭକ୍ତି ବ୍ୟବହାର)

पश्यतु वदतु- ଦେଖ, କୁହ



वृक्षात् फलानि पतन्ति ।



बालः वाहनात् अवतरति ।



नलिकायाः जलं निपतति ।



महिला नद्याः जलम् आनयति ।

**उच्चैः पठतु** - ବଡ଼ପାଟିରେ ପଢ଼ ।

- अभिनेता विदेशात् आगच्छति ।
- वृष्टिः आकाशात् पतति ।
- वानरः वनात् आगच्छति ।
- जनकः नौकायाः अवतरति ।
- पुष्पं तरोः पतति ।

**ଶବ୍ଦାର୍ଥ** - ବାହନାତ୍ - ଗାଡ଼ିରୁ, ନୌକାୟାଃ - ନୌକାରୁ, ତରୋଃ - ଗଛରୁ ।

- तैलं कूप्या: स्रवति ।
- पर्वतेभ्य: नद्य: प्रवहन्ति ।
- नेत्राभ्याम् अश्रूणि पतन्ति ।
- सा हस्ताभ्यां कङ्कणानि निष्कासयति ।
- फलेभ्य: बीजानि प्राप्नुम: ।
- बाला: नदीभ्य: जलानि आनयन्ति ।
- पुत्रा: जनकेभ्य: स्नेहं प्राप्नुवन्ति ।

## अवधेयम् (ମନେରଖ)

| प्रथमाविभक्ति: | पञ्चमीविभक्ति: | | |
|---|---|---|---|
| एकवचनम् | एकवचनम् | द्विवचनम् | बहुवचनम् |
| घट: | घटात् | घटाभ्याम् | घटेभ्य: |
| हस्त: | हस्तात् | हस्ताभ्याम् | हस्तेभ्य: |
| पेटिका | पेटिकाया: | पेटिकाभ्याम् | पेटिकाभ्य: |
| लेखनी | लेखन्या: | लेखनीभ्याम् | लेखनीभ्य: |
| गुरु: | गुरो: | गुरुभ्याम् | गुरुभ्य: |
| धेनु: | धेनो: / धेन्वा: | धेनुभ्याम् | धेनुभ्य: |
| वधू: | वध्वा: | वधूभ्याम् | वधूभ्य: |
| वनम् | वनात् | वनाभ्याम् | वनेभ्य: |

**ଶବ୍ଦାର୍ଥ :** କୂପ୍ୟାଃ - ବୋତଲରୁ, ନେତ୍ରାଭ୍ୟାମ୍ - ଆଖିରୁ, ଫଳେଭ୍ୟଃ - ଫଳରୁ, ଜନକେଭ୍ୟଃ - ବାପାଙ୍କଠାରୁ, ନିଷ୍କାସୟତି - ବାହାରକରୁଛି, ପ୍ରାପ୍ନୁମଃ - ଆମ୍ଭେମାନେ ପାଉଅଛୁ, ପ୍ରାପ୍ନୁବନ୍ତି - ପାଆନ୍ତି / ଲାଭକରନ୍ତି ।

## अभ्यासः (ଅଭ୍ୟାସ)



**१. शून्यस्थानानि पूरयतु (ଶୂନ୍ୟସ୍ଥାନ ପୂରଣ କର)**

क) देशात्, देशाभ्याम्________ ।

ख) ________ लताभ्याम्, लताभ्यः ।

ग) ________वधूभ्याम्, वधूभ्यः ।

घ) गुरोः________गुरुभ्यः ।

ङ) नद्याः, नदीभ्याम् ________।

**२. मातृभाषया अर्थं लिखतु । (ମାତୃଭାଷାରେ ଅର୍ଥ ଲେଖ)**

हस्ताभ्याम्, पर्वतेभ्यः, जनकात्, घटात्, धेनोः ।

**३. संस्कृतेन लिखतु । (ସଂସ୍କୃତରେ ଲେଖ)**

ନଦୀମାନଙ୍କରୁ, ଫଳରୁ, ଆଖିଦୁଇଟିରୁ, ଡଙ୍ଗାରୁ, ଆକାଶରୁ ।

**४. कोष्ठकस्थानां शब्दानां साहाय्येन वाक्यानि लिखतु ।**

| | | |
|---|---|---|
| अश्वः | वृक्षात् | पतति |
| नदी | आकाशात् | आगच्छति |
| फलम् | ग्रामात् | वहति |
| वृष्टिः | पर्वतात् | |

५.	चित्रं पश्यतु, बालकः कस्मात् किं स्वीकरोति इति लिखतु ।

(ଚିତ୍ର ଦେଖି ପିଲାଟି କାହାଠାରୁ କ'ଣ ଗ୍ରହଣ କରୁଛି ଲେଖ ।)



यथा - बालकः मित्रात् वाहनं स्वीकरोति ।

________________ ________________

________________ ________________

________________ ________________

________________ ________________

६. शून्यस्थाने उचितं पदं लिखतु - (ଶୂନ୍ୟସ୍ଥାନରେ ଶୁଦ୍ଧ ପଦ ଲେଖ)

क) ________ जनाः भारतम् आगच्छन्ति ।

ख) पक्षिणः ________ सरोवरम् आगच्छन्ति ।

ग) ________ पर्णानि पतन्ति ।

घ) ________ प्रकाशः आगच्छति ।

ङ) महान् वृक्षः ________ उद्भवति ।

(बीजात्, लताभ्यः, सवितुः, विदेशात्, दूरात्)

ତୁମପାଇଁ କାମ - ଏହି ପାଠରୁ ୧୦ଟି ସଂସ୍କୃତ ବାକ୍ୟ ସୁନ୍ଦର ଅକ୍ଷରରେ ଖାତାରେ ଲେଖି ଶିକ୍ଷକଙ୍କୁ ଦେଖାଅ ।

***

# पञ्चदशः पाठः

## षष्ठीविभक्ति-प्रयोगः - ଷଷ୍ଠୀ ବିଭକ୍ତି ବ୍ୟବହାର

पश्यतु उच्चैः पठतु (ଦେଖ ଓ ବଡ଼ପାଟିରେ ପଢ଼)



रामकृष्णः



विवेकानन्दः




ओडिशा

रामकृष्णस्य शिष्यः विवेकानन्दः । ओडिशायाः राजधानी भुवनेश्वरम् ।



धेनुः



वत्सः



वृक्षः



फलम्

धेनोः वत्सः ।

वृक्षस्य फलम् ।

→ देशस्य नाम भारतम् ।

→ शिवस्य पुत्रः गणेशः ।

→ पत्रिकायाः नाम उत्कलप्रसङ्गः ।

→ नद्याः नाम गङ्गा।

→ कादम्बर्याः लेखकः बाणभट्टः।

→ पुस्तकस्य नाम कलिका।

→ रामायणस्य कर्त्ता वाल्मीकिः।

→ गृहस्य नाम श्रीकुटीरम्।

→ अर्जुनस्य मित्रं श्रीकृष्णः।

→ वेदस्य नाम यजुः।

उच्चैः पठतु - (ବଡ଼ପାଟିରେ ପଢ଼)

## अवधेयम् (ମନେରଖ)

| प्रथमाविभक्तिः | षष्ठीविभक्तिः | | |
|---|---|---|---|
| एकवचनम् | एकवचनम् | द्विवचनम् | बहुवचनम् |
| नर्तकः | नर्तकस्य | नर्तकयोः | नर्तकानाम् |
| पुत्रः | पुत्रस्य | पुत्रयोः | पुत्राणाम् |
| नगरम् | नगरस्य | नगरयोः | नगराणाम् |
| मूलम् | मूलस्य | मूलयोः | मूलानाम् |
| गिरिः | गिरेः | गिर्योः | गिरीणाम् |
| अग्निः | अग्नेः | अग्न्योः | अग्नीनाम् |
| गुरुः | गुरोः | गुर्वोः | गुरूणाम् |
| भानुः | भानोः | भान्वोः | भानूनाम् |
| पिता | पितुः | पित्रोः | पितृणाम् |
| दाता | दातुः | दात्रोः | दातृणाम् |
| लता | लतायाः | लतयोः | लतानाम् |

| | | | |
|---|---|---|---|
| कविता | कवितायाः | कवितयोः | कवितानाम् |
| नीतिः | नीतेः / नीत्याः | नीत्योः | नीतीनाम् |
| धेनुः | धेनोः / धेन्वाः | धेन्वोः | धेनूनाम् |
| वधूः | वध्वाः | वध्वोः | वधूनाम् |
| देवी | देव्याः | देव्योः | देवीनाम् |
| मार्जनी | मार्जन्याः | मार्जन्योः | मार्जनीनाम् |
| वारि | वारिणः | वारिणोः | वारीणाम् |
| अक्षि | अक्ष्णः | अक्ष्णोः | अक्ष्णाम् |
| वस्तु | वस्तुनः | वस्तुनोः | वस्तूनाम् |

**ଶବ୍ଦାର୍ଥ** – ଓଡ଼ିଶାୟାଃ – ଓଡ଼ିଶାର, ଧେନୋଃ – ଗାଈର, ନଦ୍ୟାଃ – ନଈର, ବଧ୍ୱାଃ – ବୋହୂର, ମାର୍ଜନ୍ୟାଃ – ଝାଡୁର, ଅକ୍ଷ୍ଣଃ – ଆଖିର ।

**ମୌଖିକ ଅଭ୍ୟାସ** – ଶିକ୍ଷକ ପାଠରୁ ଏକବଚନରୂପ କହିବେ ଛାତ୍ରମାନେ ତା'ର ବହୁବଚନ ରୂପ କହିବେ ।

**ତୁମପାଇଁ କାମ** – ୫ଟି ବିଭିନ୍ନ ପଶୁ ଓ ଫଳର ଚିତ୍ର ସଂଗ୍ରହ କରି ଖାତାରେ ଲଗାଇ ତା'ର ସଂସ୍କୃତରୂପ ଲେଖ ।

ଅଥବା ନିଜେ ସୁନ୍ଦର ଚିତ୍ର ଅଙ୍କନ କର ।

# अभ्यासः (ଅଭ୍ୟାସ)



१. **बन्धनीमध्यस्थ शूद्ध पदैः शुन्यस्थानानि रूरयतु।**
ବନ୍ଧନୀମଧ୍ୟରେ ଥିବା ଶୁଦ୍ଧପଦରେ ଶୂନ୍ୟସ୍ଥାନ ପୂରଣକର।

यथा - <u>भारतस्य</u> राजधानी देहली। (भारतात्, भारतस्य)

क) ________ राजधानी भुवनेश्वरम्। (ओडिशायाम्, ओडिशायाः)

ख) ________ राजधानी श्रीनगरम्। (काश्मीरस्य, काश्मीरात्)

ग) ________ राजधानी गान्धिनगरम्। (गुजरातस्य, गुजराते)

घ) ________ मुखं प्रशान्तं भवति। (मुनौ, मुनेः)

ङ) ________ गतिः वक्रा। (नद्या, न द्यः)

२. **स्तम्भमेलनं करोतु। (ସ୍ତମ୍ଭମେଳନ କର)**

| क - स्तम्भः | ख-स्तम्भ |
|---|---|
| गृहस्य | वेदानाम् |
| वेदस्य | नदीनाम् |
| लेखन्याः | गृहाणाम् |
| बालिकायाः | लेखनीनाम् |
| नद्याः | बालिकानाम् |

३. **मातृभाषया अर्थं लिखतु। (ମାତୃଭାଷାରେ ଅର୍ଥ ଲେଖ)**
पत्रिकायाः, धेनोः, गिरीणाम्, लतायाः, भानोः।

४. **संस्कृतेन लिखतु। (ସଂସ୍କୃତରେ ଲେଖ)**
ଅଗ୍ନିର, ବାପାଙ୍କର, ଲତାଗୁଡ଼ିକର, ଆଖିର, ନଈର।

५. **वाक्यानि रचयतु। (ବାକ୍ୟରଚନା କର)**

देशस्य, शिवस्य, पत्रिकायाः, वेदस्य, नगरस्य।

२. स्तम्भमेलनं करोतु । (ସ୍ତମ୍ଭମେଳନ କର)

| क - स्तम्भ: | ख-स्तम्भ |
|---|---|
| गृहस्य | वेदानाम् |
| वेदस्य | नदीनाम् |
| लेखन्या: | गृहाणाम् |
| बालिकाया: | लेखनीनाम् |
| नद्या: | बालिकानाम् |

३. मातृभाषया अर्थं लिखतु । (ସଂସ୍କୃତରେ ଅର୍ଥ ଲେଖ)

पत्रिकाया:, धेनो:, गिरीणाम्, लताया:, भानो: ।

४. संस्कृतेन लिखतु । (ସଂସ୍କୃତରେ ଲେଖ)

ଅଗ୍ନିର, ବାପାଙ୍କର, ଲତାଗୁଡ଼ିକର, ଆଖିର, ନଈର ।

५. वाक्यानि रचयतु । (ବାକ୍ୟରଚନା କର)

देशस्य, शिवस्य, पत्रिकाया:, वेदस्य, नगरस्य ।

६. उचितपदै: रिक्तस्थानं पूरयतु - (ଉଚିତ ପଦରେ ଶୂନ୍ୟସ୍ଥାନ ପୂରଣ କର)

यथा - वयं प्रतिदिनं <u>महापुरुषाणां</u> जीवनचरितं पठाम: ।

- गोपालक: ________ पालनं करोति ।
- तेषां ________ कविता: रमणीया: सन्ति ।
- ________ आज्ञा पालनीया ।
- विवेकानन्दस्य ________ पठनेन शान्ति: भवति ।
- ________ जलं कलुषितं भवति ।

(उपदेशानां, नदीनां, महापुरुषाणां, कवीनां, धेनूनां, गुरूणाम्)

***

# षोड़शः पाठः

## सप्तमीविभक्तिप्रयोगः - ସପ୍ତମୀ ବିଭକ୍ତି ବ୍ୟବହାର

पश्यतु, उच्चैः पठतु च - ଦେଖ ଓ ବଡ଼ପାଟିରେ ପଢ଼ ।






HF2N4T

नर्तकी मञ्चे नृत्यति ।
बालकः पर्यङ्के निद्राति ।
युवकः कटे योगासनं करोति ।
धनं कोषे अस्ति ।
छात्राः विद्यालये पठन्ति ।

शिशुः दोलायाम् अस्ति ।
बालिकाः वाटिकायां भ्रमन्ति ।
भगिनी स्थालिकायां भोजनम् आनयति
जननी पाकशालायां पचति ।
वाचकः सभायां वदति ।





नौका नद्यां चलति
राज्यपालः राजधान्यां तिष्ठति
जलं कूप्याम् अस्ति ।

मीनाः जले तरन्ति ।
पशवः वने विहरन्ति ।
सिंहाः पर्वते गर्जन्ति ।

**ଶବ୍ଦାର୍ଥ** - ମଞ୍ଚେ - ମଞ୍ଚରେ, ପର୍ଯ୍ୟଙ୍କେ - ପଲଙ୍କରେ, କଟେ - ମଶିଣାରେ, କୋଷେ - ପକେଟରେ, ଦୋଲାୟାମ୍ - ଦୋଳିରେ, କୂପ୍ୟାମ୍ - ବୋତଲରେ ।






फलानि कण्डोलयो: सन्ति ।
वेदना कर्णयो: अस्ति ।
पुष्पाणि हस्तयो: सन्ति ।
दण्ड: स्तम्भयो: अस्ति ।

पुस्तकानि निधानिकयो: सन्ति
पुष्पाणि लतयो: विकसन्ति ।


जलं द्रोण्यो: निपतति ।
मीना: नद्यो: सन्ति ।





चक्राणि यानयो: सन्ति ।
अलङ्कारा: कर्णयो: भान्ति ।

**ଶବ୍ଦାର୍ଥ** - କଣ୍ଡୋଳୟୋଃ - ଦୁଇଟି ଟୋକେଇରେ, କର୍ଣ୍ଣୟୋଃ - ଦୁଇ କାନରେ, ସ୍ତମ୍ଭୟୋଃ - ଦୁଇଟି ଖୁଣ୍ଟରେ, ନିଧାନିକୟୋଃ - ଦୁଇଟିଥାକରେ, ଦ୍ରୋଣ୍ୟୋଃ - ଦୁଇଟି ବାଲ୍‌ଟିରେ।



जना: मार्गेषु भ्रमन्ति
फलानि वृक्षेषु सन्ति ।
श्लोका: ग्रन्थेषु सन्ति ।



वार्त्ता: पत्रिकासु सन्ति ।
पक्षिण: शाखासु तिष्ठन्ति ।
सिंहा: गुहासु वसन्ति ।



चित्राणि पुस्तकेषु सन्ति ।
बालका: सोपानेषु क्रीड़न्ति ।



जलं कूपीषु अस्ति ।
कमलानि सरोवरेषु विकसन्ति ।

## उच्चैः पठतु - (ବଡ଼ପାଟିରେ ପଢ଼)

## अवधेयम् (ମନେରଖ)

| प्रथमाविभक्तिः | सप्तमीविभक्तिः | | |
|---|---|---|---|
| एकवचनम् | एकवचनम् | द्विवचनम् | बहुवचनम् |
| हस्तः | हस्ते | हस्तयोः | हस्तेषु |
| प्रकोष्ठः | प्रकोष्ठे | प्रकोष्ठयोः | प्रकोष्ठेषु |
| पादः | पादे | पादयोः | पादेषु |
| कविः | कवौ | कव्योः | कविषु |
| गुरुः | गुरौ | गुर्वोः | गुरुषु |
| भ्राता | भ्रातरि | भ्रात्रोः | भ्रातृषु |
| कर्त्ता | कर्त्तरि | कर्त्रोः | कर्त्तृषु |
| पेटिका | पेटिकायाम् | पेटिकयोः | पेटिकासु |
| सञ्चिका (ଫାଇଲ) | सञ्चिकायाम् | सञ्चिकयोः | सञ्चिकासु |
| लेखनी | लेखन्याम् | लेखन्योः | लेखनीषु |
| धेनुः | धेनौ / धेन्वाम् | धेन्वोः | धेनुषु |
| रज्जुः | रज्जौ / रज्ज्वाम् | रज्ज्वोः | रज्जुषु |
| गृहम् | गृहे | गृहयोः | गृहेषु |
| नगरम् | नगरे | नगरयोः | नगरेषु |
| मधु | मधुनि | मधुनोः | मधुषु |

# अभ्यासः (ଅଭ୍ୟାସ)



१. बन्धनीमध्यस्थयथार्थशब्देन रिक्तस्थानं पूरयतु ।
ବନ୍ଧନୀମଧ୍ୟସ୍ଥ ଯଥାର୍ଥ ଶବ୍ଦରେ ଶୂନ୍ୟସ୍ଥାନ ପୂରଣକର।

यथा - सन्यासी कुटीरे कटं प्रसारयति । (कुटीरम्, कुटीरे)

क) सर्पः ________ दशति । (पादस्य, पादे)

ख) कथाः ________ सन्ति । (पुराणानि, पुराणेषु)

ग) जगन्नाथमन्दिरं ________ अस्ति । (पुरीम्, पुर्याम्)

घ) पक्षिणः ________ उपविशन्ति । (शाखासु, शाखाः)

ङ) सिंहाः ________ वसन्ति । (गुहायाम्, गुहाभिः)

२. कोष्ठक-साहाय्येन वाक्यानि लिखतु । (କୋଠରୀ ସାହାଯ୍ୟରେ ବାକ୍ୟ ରଚନା କର)

| | | |
|---|---|---|
| बालकाः | विद्यालये | क्रीडन्ति |
| कृषकः | प्रान्तरे | तिष्ठति |
| छात्राः | ग्रामे | पठन्ति |
| पक्षी | वृक्षे | |

क) ______________________


ख) ______________________

ग) ______________________

घ) ______________________

ङ) ______________________

३. चित्रं पश्यतु वाक्यानि लिखतु । (ଚିତ୍ର ଦେଖି ବାକ୍ୟ ଲେଖ)




उदाहरणम्

सर्पः बिलेषु सञ्चरति ।

१. ______________

२. ______________

३. ______________

४. ______________

५. ______________

६. ______________

७. ______________

८. ______________

(बिलेषु, गिरिषु, कन्दरासु, गुल्मेषु, गुहासु, वल्मीकेषु, तरुषु, लतासु)

४. मातृभाषया अर्थं लिखतु । (ମାତୃଭାଷାରେ ଅର୍ଥ ଲେଖ)


पर्यङ्के, कूपीषु, पत्रिकासु, गुरौ, हस्ते ।

५. संस्कृतभाषया लिखतु । (ସଂସ୍କୃତଭାଷାରେ ଲେଖ)

ପେଟିକାରେ, ପଦରେ, ଘରେ, ଫାଇଲଗୁଡ଼ିକରେ, ଭାଇମାନଙ୍କଠାରେ ।

६. उदाहरणानुसारम् एतैः पदैः वाक्यानि रचयतु ।

(ଉଦାହରଣ ଅନୁସାରେ ଏହିପଦରେ ବାକ୍ୟରଚନା କର)




उदाहरणम् -

१. जनाः आपणेषु उपविशन्ति ।

२. जनाः मार्गेषु भ्रमन्ति ।

३. ____________________

४. ____________________

५. ____________________

६. ____________________

७. ____________________

८. ____________________

***

# सप्तदशः पाठः

## आम् - न - वा प्रयोगः

ହଁ - ବା - ନା ବ୍ୟବହାର



एषः बालकः वा ?
आम्, एषः बालकः ।



सः गजः वा ?
आम्, सः गजः ।




एषा अजा वा ?
न, एषा धेनुः ।



तत् लोकयानं वा ?
न, तत् विमानम् ।



एतत् पुष्पं वा ?
न, एतत् पत्रम् ।



एते गजाः वा ?
न, एते अश्वाः ।



ते वृक्षाः वा ?
आम्, ते वृक्षाः ।




एताः मालाः वा ?
आम्, एताः मालाः



तासः गदाः वा ?
आम्, ताः गदाः ।



एतानि पुष्पाणि वा ?
आम्, एतानि पुष्पाणि ।



तानि कैरवाणि वा ?
न, तानि कमलानि ।



बालकः नृत्यति वा ?
न, बालकः न नृत्यति
बालिका नृत्यति ।



छात्रः पठति वा
आम्, छात्रः पठति ।

**ଶବ୍ଦାର୍ଥ :** କୈରବାଣି - କଇଁଫୁଲଗୁଡ଼ିକ, ଲୋକଯାନମ୍ - ବସ୍

## अभ्यासः (ଅଭ୍ୟାସ)



१. कोष्ठकस्थं चिह्नं पश्यतु, उचितवाक्यानि लिखतु -
 କୋଠରୀରେ ଥିବା ଚିହ୍ନ ଦେଖ ଠିକ୍ ବାକ୍ୟ ଲେଖ।

| | | | | | |
|---|---|---|---|---|---|
| क) | गोपबन्धुः | देशभक्तः | ✓ | सन्न्यासी | X |
| ख) | श्रीधरः | छात्रः | ✓ | वैद्यः | X |
| ग) | प्रतिभा | समाजसेविका | X | शिक्षिका | ✓ |
| घ) | सुरेशः | चित्रकारः | ✓ | कर्मकारः | X |
| ङ) | नरेन्द्रः | शिक्षकः | X | सेवकः | ✓ |
| च) | अबदुलकालामः | वैज्ञानिकः | ✓ | सैनिकः | X |

उदाहरणम् -

क) गोपबन्धुः देशभक्तः वा ? आम् सः देशभक्तः, सः सन्न्यासी न ।

ख) श्रीधरः छात्रः वा ? ____________ । ____________ ।

ग) ____________ ? ____________ । ____________ ।

घ) ____________ ? ____________ । ____________ ।

ङ) ____________ ? ____________ । ____________ ।

च) ____________ ? ____________ । ____________ ।

२. वाक्यानि रचयतु । (ବାକ୍ୟ ରଚନା କର)
सः, आम्, पुष्पाणि, नृत्यति, पठति ।

**ତୁମପାଇଁ କାମ :**


ପାଞ୍ଚଟି ପତ୍ର, ଫୁଲ, ପଶୁ, ଗଛ ଓ ଫଳର ଚିତ୍ର ସଂଗ୍ରହ କରି ଖାତାରେ ଲଗାଇ ତାର ସଂସ୍କୃତନାମ ଲେଖ। ନିଜେ ଚିତ୍ର ଅଙ୍କନ କରିପାରିଲେ ଭଲ ହେବ।

***

# अष्टादशः पाठः

**लङ्लकार-प्रयोगः** (ଅତୀତ କାଳ ପ୍ରୟୋଗ)


## चतुरः वानरः



एकस्याः नद्याः तीरे एकः जम्बुवृक्षः आसीत्। वृक्षस्य शाखायाम् एकः वानरः अवसत्। स पक्वफलानां भक्षणम् अकरोत्।

एकदा एकः मकरः वृक्षमूलम् आगच्छत्। वानरः मकरस्य कृते पक्वानि फलानि अददात्। सः मकरः कानिचन फलानि अखादत्। कानिचन भार्यायाः कृते गृहम् अनयत्। तस्य भार्या मकरं प्रति अकथयत् - "अहो जम्बुफलानि मधुराणि। यः प्रतिदिनं मधुराणि फलानि खादति, तस्य हृदयम् अवश्यं मधुरम्। भो पतिदेव ! अहं तस्य वानरस्य हृदयम् इच्छामि"।


अपरस्मिन् दिवसे मकरः पुनः वृक्षमूलम् आगच्छत्। सः वानरं प्रति अकथयत् - "मित्र ! मम भार्या तव निमन्त्रणम् अकरोत्। आगच्छ, मम पृष्ठदेशे उपविश। अहं तत्र त्वां नयामि।"



वानरः मकरपृष्ठम् आरोहत्। नदीमध्ये मकरः अवदत् - "मित्र! सत्यं वदामि। मम भार्या तव हृदयम् इच्छति।"

वानरः चकितः अभवत्, इष्टम् अस्मरत्। विचारम् अकरोत्। पुनः अकथयत्- "मम प्रियमित्र! पूर्वं कथं न अवदत्? हृदयं वृक्षस्य कोटरे अस्ति। अधुना तत्र मां नय। तत् आनयामि। अत्र पुनः आगच्छावः।"

ततः मकरः वानरं वृक्षमूलम् अनयत्। झटिति वानरः वृक्षस्य उपरि आगच्छत्। मूर्खः मकरः निराशः अभवत्। वानरः कौशलेन स्वप्राणान् अरक्षत्।



शब्दार्थाः-

एकस्याः नद्याः - ଗୋଟିଏ ନଈର, जम्बुवृक्षः - ଜାମୁଗଛ, शाखायाम् - ଡାଳରେ, अवसत् - ବାସ କରୁଥିଲା, पक्वफलानां - ପାଚିଲା ଫଳଗୁଡ଼ିକର, एकदा - ଥରେ, मकरः - କୁମ୍ଭୀର, कृते - ପାଇଁ, कानिचन - କେତେଗୋଟି, अवश्यम् - ନିଶ୍ଚୟ, अपरस्मिन् दिवसे - ଅନ୍ୟ ଏକ ଦିନରେ, पुनः - ପୁଣି, पृष्ठदेशे - ପିଠିରେ, उपविश - ବସ, तत्र - ସେଠାକୁ, आरोहत् - ଚଢିଲା, पूर्वं - ପୂର୍ବରୁ, कथं - କାହିଁକି, अस्ति - ଅଛି, अधुना - ବର୍ତ୍ତମାନ, ततः - ତା'ପରେ, झटिति - ଶୀଘ୍ର, उपरि - ଉପରକୁ, निराशः - ହତାଶ, अरक्षत् - ରକ୍ଷା କଲା, आसीत् - ଥିଲା ।

## अभ्यासः (ଅଭ୍ୟାସ)



१. उत्तराणि लिखतु - (ଉତ୍ତର ଲେଖ)

क) जम्बुवृक्षे कः अवसत् ?

ख) वानरः जम्बुफलानि कस्य कृते अददात् ?

ग) कानि फलानि मधुराणि ?

घ) वानरः किम् आरोहत् ?

ङ) कः निराशः अभवत् ?

२. शून्यस्थानानि पूरयतु - (ଶୂନ୍ୟସ୍ଥାନ ପୂରଣ କର)

क) एकः _______ अवसत् । (अहम्, वानरः, त्वम्)

ख) मधुराणि _______ खादति । (फलं, फले, फलानि)

ग) _______ ! सत्यं वदामि । (मित्रः, मित्रे, मित्र)

घ) सः वानरं प्रति _______ । (अकथयः, अकथयत्, अकथयम्)

ङ) वानरः _______ अभवत् । (चकितः, चकितौ, चकिताः)

३. रेखाङ्कितपदानां संशोधनं करोतु । (ରେଖାଙ୍କିତ ପଦଗୁଡ଼ିକର ସଂଶୋଧନ କର)

क) अहं तत्र त्वं नयामि ।


ख) अपरस्याः दिवसे मकरः पुनः आगच्छत् ।

ग) एकस्मिन् नद्याः तीरे जम्बुवृक्षः आसीत् ।


घ) सः पक्वफलानि भक्षणम् अकरोत् ।

ङ) मम भार्या तव हृदयम् इछामि ।

४. चित्रं पश्यतु नाम लिखतु । (ଚିତ୍ର ଦେଖ, ନାମଲେଖ)









५. मातृभाषया अनुवादं करोतु । (ମାତୃଭାଷାରେ ଅନୁବାଦ କର)

क) तस्य भार्या मकरं प्रति अकथयत् ।

ख) आगच्छ! मम पृष्ठदेशे उपविश ।

ग) मित्र ! सत्यं वदामि ।

घ) अत्र पुनः आगच्छावः।

ङ) वानरः कौशलेन सप्राणान् अरक्षत् ।

६. वाक्यानि रचयतु । (ବାକ୍ୟରଚନା କର)

एकः, अवसत्, दिवसे, फलानि, चकितः, इच्छति ।

***

# नवदशः पाठः

## उपपदविभक्तिप्रयोगः अव्ययप्रयोगःच
(ଉପପଦବିଭକ୍ତି ଓ ଅବ୍ୟୟର ପ୍ରୟୋଗ)

## विद्यालयः




| | | | |
|---|---|---|---|
| उभयतः | ଦୁଇପଟେ | अलम् | ବୃଥା |
| परितः | ଚାରିପଟେ | अन्तः | ଭିତରେ |
| सर्वतः | ସବୁଆଡ଼େ | वहिः | ବାହାରେ |
| नमः | ନମସ୍କାର | अधः | ତଳେ |
| उपरि | ଉପରେ | उच्चैः | ଜୋର୍‌ରେ / ଉପରେ |
| अभितः | ଆଡ଼କୁ | नीचैः | ଧୀରେ / ତଳେ |
| तूष्णीम् | ତୁନି | कदापि | କେବେହେଲେ |
| | | पुनः | ପୁଣି |

କ୍ରିୟାପଦ ବ୍ୟତୀତ ଯେଉଁ ଶବ୍ଦଯୋଗେ ବିଭିନ୍ନ ବିଭକ୍ତି ହୋଇଥାଏ, ତାକୁ ଉପପଦବିଭକ୍ତି କୁହାଯାଏ ।

विद्यालयः ज्ञानमन्दिरम् भवति । विद्यालयम् अभितः छात्रः गच्छति । सः भगिन्या सह गच्छति । विद्यालयं परितः प्राचीरम् अस्ति । विद्यालयम् उभयतः पुष्पवाटिका । पुष्पवाटिकां सर्वतः वृक्षाः सन्ति । विद्यालये गुरुः अस्ति । गुरवे नमः । गुरुः उपदिशति - अलं विवादेन । श्रेण्याः अन्तः तूष्णीं तिष्ठतु । विद्यालयात् वहिः मा भ्रमतु । उच्चैः पाठस्य अभ्यासं करोतु । कक्षायां नीचैः वदतु । कदापि मिथ्या मा वदतु । पुनः विषयं पठतु । वृक्षस्य अधः बालकः उपविष्टः । वृक्षस्य उपरि वानराः कूर्दन्ति ।



## अभ्यास: (ଅଭ୍ୟାସ)



१. उत्तरं लिखतु - (ଉତ୍ତର ଲେଖ)

क) विद्यालयम् अभित: क: गच्छति ?

ख) प्राचीरं कुत्र अस्ति ?

ग) पुष्पवाटिका कुत्र अस्ति ?

घ) वाटिकां सर्वत: के सन्ति ?

ङ) बालक: कुत्र उपविष्ट: ?

२. कोष्ठकस्थपदै: वाक्यानि रचयतु (କୋଷ୍ଠକସ୍ଥିତ ପଦଗୁଡ଼ିକୁ ନେଇ ବାକ୍ୟରଚନା କର)

| | | |
|---|---|---|
| विद्यालयम् | उभयत: | छात्र: गच्छति |
| | परित: | प्राचीरम् अस्ति |
| | अभित: | पुष्पवाटिका अस्ति |

३. वाक्यानि रचयतु। (ବାକ୍ୟଗୁଡ଼ିକ ରଚନା କର)

उच्चै:, पुन:, तूष्णीम्, परित:, अभित:

४. अव्ययपदानि निर्वाचयतु (ଅବ୍ୟୟ ପଦଗୁଡ଼ିକୁ ବାଛ)

पठतु, नम:, अध:, पुन:, तिष्ठतु, तूष्णीम्

५. मातृभाषया अनुवादं करोतु । (ମାତୃଭାଷାରେ ଅନୁବାଦ କର)

क) स: भगिन्या सह गच्छति ।

ख) गुरवे नम: ।

ग) कक्षायां नीचै: वदतु ।

घ) पुन: विषयं पठतु।

ङ) वृक्षस्य उपरि वानरा: कूर्दन्ति ।


***

# विंशः पाठः

## 'स्म - प्रयोग'

(ବର୍ତ୍ତମାନକାଳ କ୍ରିୟାରେ 'ସ୍ମ' ଯୋଗ କଲେ ଅତୀତକାଳକୁ ବୁଝାଏ ।)

## सम्भाषणम्



शिक्षक: - भो छात्रा: ! अद्य किम् इच्छन्ति ?

छात्रा: - श्रीमन् ! अद्य वयं विवेकानन्दविषये ज्ञातुम् इच्छाम: ।

शिक्षक: - उत्तमम् । विवेकानन्दस्य बाल्यकालविषये जानन्ति वा ?

मानस: - विवेकानन्द: बाल्ये कीदृश: आसीत् ? स: किं किं करोति स्म ?

शिक्षक: - विवेकानन्द: बाल्ये साहसी आसीत् । स: बहु क्रीड़ति स्म । प्रतिदिनं देवालयं गच्छति स्म । धर्मविषये गुरुजनान् पृच्छति स्म ।

लता: - स: अन्यत् किं करोति स्म ?

शिक्षक: - विवेकानन्द: जनसेवां करोति स्म । स: प्रतिदिनं निरामिषं खादति स्म ।

उमेश: - श्रीमन् ! मम माता वदति स्म - यत् विवेकान्द: दक्षिणेश्वरमन्दिरं गच्छति स्म ।

शिक्षक: - आम् । स प्रतिदिनं दक्षिणेश्वरं गच्छति स्म । रामकृष्णदेवं गुरुरूपेण स्वीकरोति स्म ।

गीता: - तस्य विषये अन्य: कोऽपि विशेष: ?

शिक्षक: - स: सर्वदा संहतिम् इच्छति स्म । तस्य प्रभावेण युवका: संघटिता: भवन्ति स्म । तस्य बाल्यनाम नरेन्द्र: भवति स्म । कालान्तरे स: विश्वविख्यात: भवति स्म । स: देशे विदेशे भ्रमति स्म । भारतीयसंस्कृतिम् उपदिशति स्म ।

अस्तु, अद्य पर्याप्तम् । श्व: पुन: नूतनं विषयं ज्ञास्याम: ।

## अभ्यास: (ଅଭ୍ୟାସ)



१. उत्तरं लिखतु - (ଉତ୍ତର ଲେଖ)

क) विवेकानन्द: बाल्ये कीदृश: आसीत् ?
ख) प्रतिदिनं विवेकानन्द: किं खादति स्म ?
ग) विवेकानन्द: कं गुरुरूपेण स्वीकरोति स्म ?
घ) विवेकानन्दस्य बाल्यनाम किं भवति स्म ?
ङ) क: भारतीयसंस्कृतिम् उपदिशति स्म ?

२. उचितपदेन शून्यस्थानं पूरयतु - (ଶୁଦ୍ଧପଦରେ ଶୂନ୍ୟସ୍ଥାନ ପୂରଣ କର)

क) ________ विषये अन्य: कोऽपि विशेष: ।
ख) विवेकानन्द: ________ करोति स्म ।
ग) धर्मविषये ________ पृच्छति स्म ?
घ) नूतनं विषयं ________ ।
ङ) वयं विवेकानन्दविषये ________ इच्छाम: ।

(जनसेवां, तस्य, ज्ञास्याम:, ज्ञातुम्, गुरुजनान्)

३. स्तम्भं मेलयतु - (ସ୍ତମ୍ଭମିଳନ କର)

| 'क' स्तम्भ: | 'ख' स्तम्भ: |
|---|---|
| माता | गच्छति स्म |
| दक्षिणेश्वरं | खादति स्म |
| निरामिषं | वदति स्म |
| विश्वविख्यात: | इच्छति स्म |
| संहतिम् | भवति स्म |

४. मातृभाषया अनुवादं करोतु । (ମାତୃଭାଷାରେ ଅନୁବାଦ କର)

क) विवेकानन्द: बाल्ये साहसी आसीत् ।

ख) प्रतिदिनं देवालयं गच्छति स्म ।

ग) विवेकानन्द: जनसेवां करोति स्म ।

घ) मम माता वदति स्म ।

ङ) कालान्तरे स: विश्वविख्यात: भवति स्म।

५. वाक्यानि रचयतु । (ବାକ୍ୟରଚନା କର)

मम, प्रतिदिनम्, स्म, नूतनम्, करोति, खादति ।

## शब्दार्था:

**अद्य - ଆଜି, किम् - କ'ଣ, श्रीमन् - ମହାଶୟ, ज्ञातुम् - ଜାଣିବାକୁ, उत्तमम् - ଭଲ, करोति स्म - କରୁଥିଲେ, आसीत् - ଥିଲେ, क्रीड़ति स्म - ଖେଳୁଥିଲେ, स्वीकरोति स्म - ଗ୍ରହଣ କରିଥିଲେ, कोऽपि - କିଛି କେହିହେଲେ ମଧ୍ୟ, तस्य - ତାଙ୍କର, पर्याप्तम् - ଯଥେଷ୍ଟ, पुन: - ପୁଣି, संहतिम् - ଏକତା, ज्ञास्याम: - ଜାଣିବା**

# एकविंश: पाठ:

## शिशुगीतम् - ଶିଶୁ ଗୀତ

## भारतभक्ता:

वयं बालका: भारतभक्ता:
वयं बालिका: भारतभक्ता:
वयं हि सर्वे भारतभक्ता:
भुवनत्रयं विजेतुं शक्ता:.... । वयम्...

वयं सुधीरा: वयं सुवीरा:
हृष्टमानसा: पुष्टशरीरा:
सम्यक् पठाम: सम्यक् लिखाम:
लोकसेवायां युक्ता: भवाम:.... । वयम्

जातिधर्ममतभेदं त्यक्त्वा
भारतवर्षं पूज्यं मत्वा
ऐक्यभावं हृदये धृत्वा
देशसेवायामनुरक्ता:..... । वयम् ।

**शब्दार्था:**

भारतभक्ता: - ଭାରତ ଭକ୍ତ, हि - ଯେଣୁ, सर्वे - ସମସ୍ତେ, भुवनत्रयं - ତିନିଭୁବନକୁ (ସ୍ୱର୍ଗ ମର୍ତ୍ତ୍ୟ ପାତାଳ) जेतुं - ଜୟ କରିବାକୁ, सुधीरा: - ଅତ୍ୟନ୍ତ ଧୀର, सुवीरा: - ଅତ୍ୟନ୍ତ ବୀର, हृष्टमानसा: - ଆନନ୍ଦମନା, पुष्टशरीरा: - ସୁସ୍ଥ ଶରୀର, सम्यक् - ଭଲ, त्यक्त्वा - ତ୍ୟାଗକରି, मत्वा - ମନେ କରି, धृत्वा - ଧରି, देशसेवायाम् - ଦେଶ ସେବାରେ, ଅନୁରକ୍ତାଃ - ଆଗ୍ରହୀ ।

## अभ्यासः (ଅଭ୍ୟାସ)

**१. शून्यस्थानं पूरयतु। (ଶୂନ୍ୟସ୍ଥାନ ପୂରଣ କର)**

(क) वयं हि ________ भारतभक्ताः।(सर्वः, सर्वे)

(ख) ________ विजेतुं शक्ताः। (भुवनत्रयं, भुवनद्वयम्)

(ग) ________ सुवीराः। (अहम्, वयम्)

(घ) ________ पठामः।(सम्यक्, शरीराः)

(ङ) ________ पूज्यं मत्वा। (भारतवर्षम्, हृदये)

**२. स्तम्भमेलनं करोतु। (ସ୍ତମ୍ଭମେଳନ କର)**

| (क) | (ख) |
|---|---|
| वयं | लिखामः |
| सम्यक् | बालकाः |
| लोकसेवायां | हृदये |
| ऐक्यभावं | युक्ताः |

**३. वाक्यानि रचयतु। (ବାକ୍ୟ ରଚନା କର)**

वयम्, सर्वे, पठामः, लिखामः, भवामः

**४. मातृभाषया अर्थं लिखतु। (ମାତୃଭାଷାରେ ଅର୍ଥ ଲେଖ)**

हि, भुवनत्रयम्, पुष्टशरीराः, सम्यक्, धृत्वा

**५. संस्कृतेन लिखतु। (ସଂସ୍କୃତରେ ଲେଖ)**

ତ୍ୟାଗକରି, ସମସ୍ତେ, ଜୟକରିବାକୁ, ଆନନ୍ଦମନା, ଦେଶସେବାରେ ।

# प्रहेलिका (उत्तरं वदतु)

कस्तुरी जायते कस्मात् ?
को हन्ति करिणां कुलम् ?
किं कुर्यात् कातरो युद्धे ?
मृगात् सिंह: पलायते ।।१।।

वृक्षाग्रवासी न च पक्षिराज:
त्रिनेत्रधारी न च शूलपाणि: ।
त्वग्वस्त्रधारी न च सिद्धयोगी
जलं च बिभ्रन्नघटो न मेघ: ।।२।।

कं संजघान कृष्ण: (कंसम्)
का शीतलवाहिनी गङ्गा ।(काशी)
के दारपोषणरता: (केदार)
कं बलवन्तं न बाधते शीतम् ।।३।। (कम्बल)

अपदो दूरगामी च साक्षरो न च पण्डित: ।
अमुख: स्फुटवक्ता च यो जानाति स पण्डित: ।।४।।

न तस्यादिर्न तस्यान्त: मध्ये यस्तस्य तिष्ठति ।
तवाप्यस्ति ममाप्यस्ति यदि जानासि तद् वद ।।५।।

**ଶବ୍ଦାର୍ଥ :-**

जायते - ଜାତ ହୁଏ, हन्ति - ହତ୍ୟାକରେ, करिणाम् - ହାତୀମାନଙ୍କର कातर: - ଭୀରୁ, शूलपाणि:- ଶିବ, त्वक् - ଚମଡ଼ା, बिभ्रन् - ଧାରଣ କରୁଥିବା, जघान - ମାରିଥିଲେ, पोषणरता: - ପୋଷଣକାରୀ, स्फुटवक्ता - ଯଥାର୍ଥବକ୍ତା ।

୧- ପ୍ରଥମ ତିନିଧାଡ଼ିର ଉତ୍ତର ୪ର୍ଥ ଧାଡ଼ିରେ ଅଛି । ୨- ନାରିକେଳ । ୩- ପ୍ରଶ୍ନରେ ଉତ୍ତର ରହିଛି - କଂସଂ, କାଶୀତଳବାହିନୀ, କେଦାର ପୋଷଣରତାଃ, କଂବଳବନ୍ତମ୍ । ୪- ପତ୍ର (ଚିଠି) । ୫- ନୟନ

# अभ्यासः (ଅଭ୍ୟାସ)

## १. संस्कृतेनं उत्तरं लिखतु। (ସଂସ୍କୃତରେ ଉତ୍ତର ଲେଖ)

(क) कस्तुरी कस्मात् जायते ?

(ख) करिणां कुलं कः हन्ति ?

(ग) कातरः युद्धे किं करोति ?

(घ) कृष्णः कं संजघान ?

(ङ) कं बलवन्तं न बाधते शीतम् ?

(कम्बलवन्तभ्, पलायते, मृगात्, सिंहः, कंसम्)

## २. शून्यस्थान पूरयतु। (ଶୂନ୍ୟସ୍ଥାନ ପୂରଣ କର)

(क) वृक्षाग्रवासी न च ________ ।

(ख) ________ न च शूलपाणिः।

(ग) कं संजघान ________ ।

(घ) ________ स्फुटवक्ता।

(ङ) साक्षरो न च________ ।

(पण्डितः, पक्षिराजः, कृष्णः, त्रिनेत्रधारी, अमुखः)

## ३. मातृभाषया अर्थं लिखतु। (ମାତୃଭାଷାରେ ଅର୍ଥ ଲେଖ)

(क) कं संजघान कृष्णः ?

(ख) कंसं जघान कृष्णः।

(ग) का शीतलवाहिनी गङ्गा ?

(घ) काशीतलवाहिनी गङ्गा।

(ङ) के दारपोषणरताः ?

(च) केदारपोषणरताः।

(छ) कं बलवन्तं न बाधते शीतम् ?

(ज) कंबलवन्तं न बाधते शीतम् ?

# के च ते ?



**वानरः**

पश्यत वानरराजं दक्षम्
कूर्दति वृक्षादन्यं वृक्षम् ।



**कुक्कुरः**

दृष्ट्वा रात्रौ एकं चौरम्
भषति कुक्कुरो वारं वारम् ।

**मार्जारी**

माजारीयं खादति मीनम्
पिबति च दुग्धं तिष्ठति मौनम् ।






**मधुपः**

मधुपोऽयं विहरति सानन्दम् ।
पायं पायं मधुमकरन्दम् ॥

**हस्ती**

हस्ती गच्छति मन्दसुमन्दम् ।
जनयति चासौ नयनानन्दम् ॥





**शशकः**

शशकः सततं कुरुते क्रीडाम्
ततः परमनुभवति पीडाम् ।

शब्दार्थाः-

दक्षम् - ସମର୍ଥ, कूर्दति - ଡେଉଁଛି, दृष्ट्वा - ଦେଖି, रात्रौ - ରାତିରେ भषति - ଭୁକୁଛି, मार्जारीयं - (मार्जारी + इयम्) ଏହି ମାଈ ବିଲେଇ, मीनम् - ମାଛକୁ, च - ଓ, मौनम् - ନୀରବ, मधुपः - ଭ୍ରମର, मधुपः + अयं (मधुपोऽयं) ଏହି ଭ୍ରମର, विहरति - ବୁଲୁଛି, पायं पायं - ପିଇ ପିଇ, मकरन्दम् - ଫୁଲରସ, मन्दम् - ଧୀରେ, असौ - ସେ, शशकः- ଠେକୁଆ, सततम् - ସବୁବେଳେ, ततः - ତା'ପରେ, पीडाम् - କଷ୍ଟ ।

श्लोकार्थाः

१- यूयं दक्षं वानरराजं पश्यत। असौ वृक्षात् अन्यं वृक्षं कूर्दति।

२- रात्रौ एकं चौरं दृष्ट्वा कुक्कुरः वारं वारं भषति।

३- इयं मार्जारी मीनं खादति। दुग्धं पिबति। मौनं च तिष्ठति।

४- अयं मधुपः मधुमकरन्दं पायं पायं सानन्दं विहरति।

५- हस्ती मन्दसुमन्दं गच्छति। नयनानन्दं च असौ जनयति।

६- शशकः सततं क्रीडां कुरुते। ततः परं पीडाम् अनुभवति।

## अभ्यासः (ଅଭ୍ୟାସ)

१. शून्यस्थानं पूरयतु (ଶୂନ୍ୟସ୍ଥାନ ପୂରଣକର ।)

(क) शशकः सततं ________ कुरुते। (क्रीडाम्, क्रीडा)

(ख) मन्दं मन्दं हस्ती ________। (गच्छति, गच्छन्ति)

(ग) मधुपः ________ विहरति। (अयम्, इयम्)

(घ) ________ मार्जारी मीनं खादति। (अयम्, इयम्)

(ङ) असौ नयनानन्दं ________। (जनयति, जनयन्ति)

२. मातृभाषया अर्थं लिखतु (ମାତୃଭାଷାରେ ଅର୍ଥ ଲେଖ)

मधुपः, शशकः, पिबति, भषति, कूर्दति

३. संस्कृतेन लिखतु (ସଂସ୍କୃତରେ ଲେଖ)

ଅନୁଭବ କରେ, ବିହାର କରେ, ଦେଖ୍, ଜନ୍ମାଏ, ପୀଡ଼ା

४. स्तम्भमेलनं करोतु (ସ୍ତମ୍ଭ ମିଳାଅ)

| (क) | (ख) |
|---|---|
| अयं | विहरति |
| सानन्दं | भषति |
| मौनं | पश्यत |
| वारंवारं | मधुपः |
| वानरराजं | तिष्ठति |

•••

# सुभाषितानि

माता शत्रुः पिता वैरी येन बालो न पाठितः ।
न शोभते सभामध्ये हंसमध्ये बको यथा ।।१।।

अर्थ:- या माता बालं न पाठयति सा - माता शत्रुः भवति । यः पिता न पाठयति । सः पिता वैरी भवति । हंसमध्ये वकः यथा न शोभते तथा अयं मूर्खः बालः सभामध्ये न शोभते ।

पठतो नास्ति मूर्खत्वं जपतो नास्ति पातकम् ।
मौनिनः कलहः नास्ति न भयं चास्ति जाग्रतः ।।२।।

अर्थ:- पठतः जनस्य मूर्खत्वं नास्ति । जपतः लोकस्य पातकं नास्ति । मौनिजनस्य कलहः नास्ति । जाग्रतः जनस्य भयं नास्ति ।

विद्या ददाति विनयं विनयाद् याति पात्रताम् ।
पात्रत्वाद् धनम् आप्नोति धनाद्धर्मः ततः सुखम् ।।३।।

अर्थ:- विद्या विनयं ददाति । विनयात् पात्रतां याति ।
पात्रत्वात् धनम् आप्नोति । धनात् धर्मः ततः सुखम् आप्नोति ।

वृक्षो ददाति पुष्पाणि शाकं सस्यं फलानि तु ।
प्राणवायुं (अम्लजानं) च छायां वै कुरु वृक्षस्य रोपणम् ।।४।।

अर्थः- वृक्षः पुष्पाणि शाकं सस्यं फलानि प्राणवायुं (अम्लजानं) छायां च ददाति । अतः वृक्षस्य रोपणं कुरु ।

अयं निजः परो वेति गणना लघुचेतसाम् ।
उदारचरितानां तु वसुधैव कुटुम्बकम् ।।५।।

अर्थ:-अयं निजः परः वा इति लघुचेतसां गणना भवति । किन्तु उदारचरितानां वसुधा एव कुटुम्बकम् इति गणना भवति ।

हस्तस्य भूषणं दानं सत्यं कण्ठस्य भूषणम् ।
श्रोत्रस्य भूषणं शास्त्रं भूषणैः किं प्रयोजनम् ।।६।।

अर्थः दानं हस्तस्य भूषणम्। सत्यं कण्ठस्य भूषणम्। शास्त्रं- श्रोत्रस्य भूषणम्। अतः भूषणैः किं वा प्रयोजनम्।

**ଶବ୍ଦାର୍ଥ :** ଶତ୍ରୁଃ-କ୍ଷତିକାରକ, ବୈରୀ-ବିରୋଧୀ, ନପାଠିତଃ-ପଢ଼ାଯାଇନାହିଁ, ଶୋଭତେ-ଶୋଭାପାଏ, ମୌନିନଃ-ମୌନଥିବାଲୋକର, ପାତ୍ରତାମ୍-ଯୋଗ୍ୟତା, ଆପ୍ନୋତି-ପ୍ରାପ୍ତହୁଏ, ଗଣନା-ବିଚାର, ଲଘୁଚେତସାମ୍-ନୀଚମନାମାନଙ୍କର, କୁଟୁମ୍ବକମ୍-ପରିବାର, ଶ୍ରୋତ୍ରସ୍ୟ-କାନର

## अभ्यासः (ଅଭ୍ୟାସ)

### १.शून्यस्थानं पूरयतु। (ଶୂନ୍ୟସ୍ଥାନ ପୂରଣକର)

(क) येन ________ न पाठितः। (बालः, बाला)

(ख) जपतो ________ पातकम्। (नास्ति, अस्ति)

(ग) विनयात्________ पात्रताम्। (याति, यान्ति)

(घ) कुरु ________ रोपणम्। (वृक्षस्य, वृक्षम्)

(ङ) हस्तस्य भूषणं ________ । (सत्यं, दानम्)

### २.मातृभाषया अर्थं लिखतु। (ମାତୃଭାଷାରେ ଅର୍ଥ ଲେଖ)

(क) भूषणैः किं प्रयोजनम्।

(ख) मौनिनः कलहः नास्ति।

(ग) वसुधैव कुटुम्बकम्।

(घ) वृक्षो ददाति पुष्पाणि।

(ङ) येन बालो न पाठितः

### ३.संस्कृतेन लिखतु (ସଂସ୍କୃତରେ ଲେଖ)

ପାପନଥାଏ, ଶୋଭାପାଏନାହିଁ, ଗଛପ୍ରାଣବାୟୁ ଦିଏ, କଣ୍ଠର ଭୂଷଣ ସତ୍ୟ, ବିନୟରୁ ଯୋଗ୍ୟତା ଜାତ ହୁଏ।

### ४.स्तम्भमेलनं करोतु। (ସ୍ତମ୍ଭମେଳନ କର)

| (क) | (ख) |
|---|---|
| ततः | ददाति |
| विद्या | भूषणम् |
| हस्तस्य | सुखम् |
| परो | आप्नोति |
| धनम् | वेति |

# रक्ष रक्ष काननम्



रक्ष रक्ष काननं
वृक्षराशि - शोभनम् ।
काले वृष्टि - कारकम्
शुद्धवायुदायकम् ॥१॥

रोगवारणोचिता
मूलिका वने स्थिता ।
सम्पदां हि सम्पदं
काननं विचिन्तय ॥२॥

काननं हि जीवनं
रक्ष रक्ष तद् धनम् ।
काननस्य नाशनं
स्वस्य विद्धि नाशनम् ॥३॥

काननस्य वर्धने
निरतः सत्यरक्षणे ।
त्वं भविष्यचिन्तने
युक्तमानसो भव ॥४॥

**शब्दार्थाः** - राशिः - समूहः, काले - उपयुक्तसमये, रोगवारण - रोगनिवारक, रोगवारणोचिता - रोगवारण + उचिता, विद्धि - अवगच्छतु

# अभ्यास: (ଅଭ୍ୟାସ)

१. **शून्यस्थानं पूरयतु (ଶୂନ୍ୟସ୍ଥାନ ପୂରଣକର ।)**

(क) _______ हि जीवनम्। (कानन:, काननम्)

(ख) युक्तमानसो _______ । (भव, भवत:)

(ग) रक्ष रक्ष _______ धनम्। (स:, तत्)

(घ) मूलिका _______ स्थिता। (ग्रामे, वने)

(ङ) _______ वृष्टिकारकम्। (काले, काल:)

२. **मातृभाषया अर्थं लिखतु (ମାତୃଭାଷାରେ ଅର୍ଥ ଲେଖ)**

काले, वृष्टि:, काननस्य, भव, निरत:


३. **संस्कृतेन लिखतु (ସଂସ୍କୃତରେ ଲେଖ)**

ଜଙ୍ଗଲ ରକ୍ଷାକର, ସେହି ଧନ ରକ୍ଷାକର, ଜଙ୍ଗଲହିଁ ଜୀବନ, ଯୁକ୍ତ ମାନସ ହୁଅ, ଜଙ୍ଗଲର ବିନାଶ ନିଜର ବିନାଶ ।

४. **स्तम्भमेलनं करोतु (ସ୍ତମ୍ଭ ମିଳାଅ)**

| (क) | (ख) |
|---|---|
| तत् | भव |
| रक्ष | नाशनम् |
| त्वं | धनम् |
| स्वस्य | जीवनम् |
| काननं | काननम् |

# उपदेशः



प्रत्युषकाले उत्तिष्ठतु
स्वकीयकर्म विदधातु
अल्पमाहारं स्वीकरोतु
गृहपठनम् आचरतु ॥

विद्यामन्दिरम् आगच्छतु
तत्र नियमान् पालयतु ।
शृणोतु पठतु लिखतु
क्रीडतु सत्यं कथयतु ॥

पौष्टिकं भोजनं खादतु
विशुद्धं पानीयं पिबतु ।
हितोपदेशं पालयतु
परोपकारं साधयतु ॥

आलस्यभावं वर्जयतु
माता पितरौ तोषयतु
देशसेवकान् पूजयतु
समाजे आदरमाप्नोतु ॥

देशगौरवं बोधयतु
अनुजान् नित्यं मोदयतु
गुरुजनान् सम्मानयतु
विश्वबन्धुत्वं स्थापयतु ॥

(गीतं सस्वरं गायतु)

## अभ्यासः (ଅଭ୍ୟାସ)

१. शून्यस्थानं पूरयतु (ଶୂନ୍ୟସ୍ଥାନ ପୂରଣକର ।)

(क) पौष्टिकं ________ खादतु। (भोजनम्, भोजनः)

(ख) परोपकारं ________। (साधयतु, साधय)

(ग) ________ आदरम् आप्नोतु। (समाजः, समाजे)

(घ) ________ सम्मानयतु। (गुरुजनाः, गुरुजनान्)

(ङ) विशुद्धं ________ पिबतु। (भोजनम्, पानीयम्)

२. मातृभाषया अर्थं लिखतु (ମାତୃଭାଷାରେ ଅର୍ଥ ଲେଖ)

आचरतु, पालयतु, लिखतु, खादतु, पिबतु, स्थापयतु।

३. संस्कृतेन लिखतु (ସଂସ୍କୃତରେ ଲେଖ)

ସମାଜରେ, ନିଜକାମ, ନିୟମ ଗୁଡ଼ିକୁ, ସାଧନକରନ୍ତୁ, ବୁଝାନ୍ତୁ ।

४. स्तम्भमेलनं करोतु (ସ୍ତମ୍ଭ ମିଳାଅ)

| (क) | (ख) |
|---|---|
| पौष्टिकं | पिबतु |
| पानीयं | पितरौ |
| माता | मोदयतु |
| नित्यं | पालयतु |
| हितोपदेशं | भोजनम् |

●●●